

श्रीजोपीजनवल्लभायनमः॥ नमोनक्तिरसास्वाद दात्रेवल्लभसूनवे॥ कलिकल्मषघातिन्यैतद्वा
ल्येवनमःसदा॥१॥ नक्तेरसाधारण कारणे निश्चिकीर्षवोनुरूपं मंगलमाचरंतिब्रह्मादीतिउत्त
माधिकारिणामपिब्रह्मादीनांश्रोतुंरुचिनाकथायस्याराधायामानंचित्तसमुन्नतिमनुदती
तितथा॥तंलक्ष्मनुमःस्तुमइत्यर्थः॥किंवातस्यैवलक्ष्मस्यैवानुग्रहेणैवेकेनलभ्यांप्राप्यांइदमे
वाग्रेविवादकारणमंशयबीजवाक्यंहेयम्॥नक्तिंवनुमः॥तदीयांश्चातस्येवाऽनन्यभक्तानित्यर्थः॥
अनुग्रहेतरयागादिसाधनानामेवनक्तिहेत्वमितिवादीशंकतेनन्विति॥अनुग्रहेकलभ्यांभक्ति
मितियद्वचनमुक्तंतत्रश्रद्धामृतकथायांमइत्यादिवल्लमालैरनेकैर्बहुभिःश्रमालेशदृष्टैः
सहविसंवादोविरुद्धाधीकमिवभातिइवशब्देनतत्वापरिक्षयःसूचितः॥ननुघटादिकार्येय
थादंडत्वमेवकारणतावच्छेदकंनाद्दष्टत्वात्तस्यस्वरूपयोग्यतासंपादकत्वात्एवमत्रापिनक्तु
स्तत्रिप्रत्यनुग्रहस्यैवकारणत्वंननुधर्मादीनामपितेषांस्वरूपयोग्यतासंपादकत्वेनान्यथा
सिद्धत्वादोपचारिकंकारणत्वमितिचेत्तत्राह॥नचेतिजीवत्वेनैवेति॥जीवनत्वमेवस्वरूपयोग्य
तावच्छेदकंननुधर्मादिसत्वमपीतिभावः॥देवोसुरोमनुष्योवेतिसामान्येननिर्देशादित्यर्थः॥अ
नु केति॥साहजिकाच्छिइत्यादिकंघटादिषुजनाहरणादियोग्यतासंपादकंनत्वेतरोत्पन्ना
लपीतादियथातथात्रापिजीवत्वस्यैवतथात्वेनधर्मवत्वस्यापीतिभावः॥ननुधर्मवत्वादिहे
तोर्नैक्यिमत्वसाध्याभावशंकामित्वेनव्यभिचारादसाधकोयंहेतोरितियत्तवमतंतत्रसम्यक्॥
यतोस्मान्निरनुग्रहस्यधर्मादिसहकारित्वमुच्यतेघटादिकार्यंदंडादेरिवअतःसह
कार्यनावनिबंधनकार्यनावोनकारणताहानिदःतथासतिदंडादेरप्यकारणत्वंस्या
तापूर्वमनुग्रहसहकृतोधर्मीहेतुरितिवादीसांप्रतमनुग्रहस्यतोषरूपत्वमंगीकृत्यत
त्रनक्तिर्हेतुरितिवैपरीत्यमंगीकृत्यतस्यांभक्तौधर्मीहेतुरित्यभिप्रेत्याहाचतथैवेत्या
रभ्यउत्पश्यामइत्यंतेनाधर्मस्यानैकांतिकत्वमाशंक्यसमाधत्तेनचेतिकार्येतिभक्तिरू
पकार्येत्यर्थः॥तदनुमानेनक्तिर्हेतुधर्मानुमानेव्याप्तेरव्यभिचारघटितत्वाद्धेतोरव्यभिचारित
त्वंहेजन्मांतरीयधर्मसिद्धिःजन्मांतरीयसिद्धधीस्तथाव्यभिचारग्रहइत्यन्योन्याश्रयलक्षणो
दोषोहेयोः॥तावनिर्क्रमितिअन्योन्याश्रयदोषस्तदोद्धेतयेदनुमानेक्रमसमधिगम्यंनक्तिर्हे
तुत्वंधर्मस्यस्यात्तन्नत्वेवमस्तिकिंत्वेतज्जन्मांतरीयधर्मरूपकारणज्ञानेवावनिर्क्रमाद्धेतुत्व

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

थैः। सवशब्दोजन्मांतरसहस्रैरित्यादिकः। ननुधर्मस्यस्वाव्यवहितकार्यानुग्रहएवहेतुत्व
युक्तं। ननुचव्यवहितेपीत्यतआह। नचेतियदा। अनुग्रहस्यहेतुत्वेसिद्धेनहेतुत्वंनक्तिहेतु
त्वंतेषुधर्मेषुनोच्यतइतिनवाच्यमितियोजना। प्रमाणमावादिति। अनुग्रहस्यसाक्षाद्धर्मजन्य
त्वेअनुग्रहद्वाराधर्माणांनक्तिहेतुत्वमित्यस्मिन्नर्थेप्रमाणंकिमपिनास्तीत्यर्थः। प्रत्युत
साक्षात्कारणत्वेप्रमाणसद्भावात्तानिवप्रमाणानिमूलएवोदाहृतानिश्रद्धामृतझर्याम्मइ
त्यादीनिधर्मजन्योनुग्रहइतिवादिनामनुग्रहस्यकिंसंस्कारादिवज्जन्यधर्मरूपत्वमिछारू
पत्ववेतिविकल्प्यैकैकशोदूषयतिकिंचेत्यादिना। नाद्यइति। प्रयाजादिजन्यापूर्ववदनुग्रहो
पिजन्यधर्मएवास्मिन्नर्थेप्रमाणानुपलब्धेः अनुपपत्त्यभावाच्चनप्रयोजनार्थकल्पनेगौरवादो
षत्राप्तिरतोनत्रयमःपक्षः। नेतरइति। इतरः फलादिसाधनः। तस्याइति। नगवदिछायानित्यत्व
धर्मिग्राहकप्रमानसिद्धानादृश्यात्वानित्यधर्मकारणसहकारित्वंविरुद्धं। नहिनित्यस्यानित्यका
रणसहकारित्वंक्वचिद्घटपटादिषुदृष्टचरं। दूषणांतरमाह। सर्गादाविति। योजीवोऽत्रनक्तीना
वीसोपिसंस्थारेनएवमुक्तिचरमकारणनक्तिंप्राप्यमुक्तएवस्यान्नत्विदानीमुपलभ्येनापि।

पुनस्तदर्थमेवप्रयतनेश्रद्धतेचनगवदनुग्रहलक्षविश्वासान्निःशंकंसाधनेसदावारेवप्रवृ
त्युपपत्तिरपीतिभावः। मर्यादामार्गीयव्यवस्थामुक्त्वा। पुष्टिमार्गीयाणामाह। अपरंवेति।
हानावैराग्यरहितानामेवेत्यत्रतद्रहितानामपीतियुक्तं। नोवेत्रज्ञाहित्यधिकारशरीरप्र
विष्टंस्यात्। इतरेति। अनुग्रहेतराणियानिसर्वाणिसाधनानिकर्माणितैःप्रत्येकंसमुदा
यात्यांसाध्यंप्राप्यंयत्फलंतत्साधनत्वंसर्वसाधनरहित्यसहितनक्तेरेवनान्यस्येत्यतो
युक्तंकल्पतरुत्वं। मुक्तिसाधनेति। वशीकृतमुक्तीनांवशीकृतसाधनानामपीत्यर्थः मुक्तिहे
तुपूर्णानामितिवा। यदिसानक्तिर्भगवदनुग्रहंविनांत्रकारांतरलभ्यापिस्यात्तदासर्वदुर्ल
भमोक्षपर्यंतंधावज्ञिःकिमितिनत्राप्ता। सर्वेकर्मीखिलंपार्थत्यागेपरिसमाप्यतइतिवचना
न्मुक्तैरपिप्रार्थ्यनक्तौनानुग्रहैकांतरसाध्यत्वमितिभावः। उक्तमार्गेतिपुष्टिमर्यादयोरि
त्यर्थः। वस्तुतोमूलाश्चेषणेक्रियमाणेमर्यादामार्गेपिनक्तिरनुग्रहैकलभ्यानसाधनल
भ्या। साधनक्रथनंत्वनुग्रहरूपकल्पवृक्षस्यसाखाविस्तारइतावानितिज्ञापनार्थंनुस्वा
न्तेत्रेणनक्तिजनकत्वक्रथनार्थमिदंतुत्वयापिनक्तिमार्गीयेणावश्यमत्युपेयमितिनुरह

स्यांऽन्यथेति। नगवदनुग्रहं विनासाधनानांनशक्तिजनकत्वेकौजायस्वमित्यस्वरसापु
नर्मृत्युमापद्येनेऽद्यमानाःस्वकर्मनिरित्याद्युक्तोयस्तृतीयमार्गप्रवाहस्तस्यापि
कथंनांगीकारंकुर्यात्साधनमात्रावरणस्यतुल्यत्वादित्यर्थः।ननुनुग्रहस्योनयत्रापा
वश्यकत्वेमर्यादायामेवसाधनोपदेशःकुशवपिकथंनेत्यतआहाकुशवितिानरोध
यतिमांयोगइत्यादिपूर्वोक्तिवचनैःसाधनानांव्यक्तिवारिमन्वयव्यतिरेकाभ्यांस्फुटमे
वातस्तत्रतद्धेतुत्वंशंकितमप्यसंभावितिसिद्धांतःएवंसतीत्यत्रनुग्रहैकलभ्यत्वेतुल्येऽप
सतिमर्यादायांयत्साधनमार्गस्यसाधनावरणस्यकरणमुपदेशोयेनात्तिसंधिनातद्
दृष्टेपूर्वेक्षापितमपिवस्तुतस्त्वित्यादिनास्फुटंकथयिष्यतइत्यर्थः।त्वैवदेशिमतंनिरस्य
तिादोषणमितिासर्गविसर्गादिवदनुग्रहस्यापिधर्मीतरत्वमेवोचितंनथासत्यनुग्रहा
दुरूपाच्छनुग्रहपूर्विकानक्रव्यार्थेक्षासासर्वत्रतत्तन्मार्गीयनक्रकार्यमात्रेसहकारिणी
कारणांतरमपेक्ष्यकार्यजनिकेत्यर्थः।नक्रियूपेकार्येपरमियात्विशेषोयदन्यनिरपेक्षा

नुग्रहसाध्यत्वमित्यर्थपातरमणीयमित्यर्थः।अत्रास्वरसबीजंकार्यमात्रस्येक्षाधीनत्वेऽनु
ग्रहस्यापिकार्यत्वात्तदिक्षाधीनत्वमेवोचितं।तस्मादवांतरव्यापारत्वमेवानुग्रहस्यनक्रौजन
यितव्यांकारणंत्विछैवेतिभावः।वस्तुतस्त्विति।सहकारिनिरपेक्षानुग्रहवादिनाप्युररीकार्य
त्वंगीकर्तव्यमित्यर्थः।तत्रोपपत्तिप्रकारमाहतथाहीति।यदेति।यस्मिन्काले।येनयेनेत्यपिहे
योवीप्सायांद्विरुक्तिः।यद्यदितिकार्यनिर्देशः।मुख्यकर्तुर्नगवतएकत्वेनवीप्साविषयत्वानु
वादकमेवकर्तृत्वेनविवक्षितं।भवतीतिवर्तमानकालोपाधिः।भावीतिभविष्यत्कालोपाधिरू
पित्यतीतकालोपाधिरेतेषुयथायथंक्रमिकेष्वेवक्रमप्राप्तेनैवहेतुनातत्तत्कार्यंकरोमिकरि
ष्यामीत्यवंप्रकारिक्षानगवदिक्षास्त्यासीदितिमंतव्यंसत्यसंकल्पत्वाद्भगवतः।ततःपूर्वंतत्त
त्कार्योत्पत्तेःप्राग्वेत्यर्थः।अन्यथेतिाकालोपाधिक्रमिकार्यानंगीकारेसाधारणकारणेचि
रकालीर्षायाएवहेतुत्वेप्राप्तेकार्यकारणेनयविषयीएवास्तयोःसर्वदासत्वादेककालमेवसक
लकार्योत्पत्तिलक्षणोदोषःप्रसज्येतेत्यर्थः।ननुदंडादिष्वेकस्यासत्वेपिघटानुत्पत्तिवदत्रापि
विकीर्षेतरकारणासमवधानान्नयुगपदुत्पत्तिप्रसंगइत्यतआहानवेतिातस्यापीतिाविकीर्षे

तरकारणसमवधानस्यापीत्यर्थः। समवधानस्यापि कार्यत्वात्तत्कारणविरोधीयाः पूर्ववद
त्रापि सत्वात्पुनरुक्तदोषएवेत्यर्थः। ननुप्रतिबंधकसत्वात्तत्रनकार्योत्पत्तिरितिचेत्तत्राह न
चेति। तत्पूर्वक्षणः इतरकारणसमवधानाव्यवहितपूर्वक्षणइत्यर्थः। तत्प्रागभावप्रयोज
र्तासामग्रीसमवधानाव्यवहितपूर्वक्षणात्प्राक्कालेप्रतिबंधकाव्यवहितपूर्वक्षणस्या
सत्वात्तदानीं कार्योत्पत्तिप्रसंगइत्यर्थः। नुयस्मिन्यस्मिन्क्षणेयद्यत्कार्यंजायतेतत्कार्यंतत्त
क्षणाधिकरणकंभवतितादृशकार्यंप्रतितस्यैवकार्यस्यप्रागभावेनावछिद्यतेविशेष्यतेत्र
न्यस्मात्पृथक्क्रियतइतियावत्सप्रागभावावछिन्नःकालः। सचसूक्ष्मोपिसंभवतीत्यतःस्थू
लोमहान्यःकालःसएवोपाधिरूपःप्रतिबंधकोभवतु। यथाप्रलयकालेसिसृक्षायांसत्यामपि
सृष्टिप्रागभावावछिन्नोनेकमन्वंतरपरिमितःस्थूलकालोपाधिःप्रतिबंधकः। अन्यथा
तत्रापिसृष्टिकेनप्रतिबध्येत। यथावसंजिहीर्षायांसत्यामपिप्रलयप्रागभावावछिन्नः
स्थूलःसृष्टिकालःप्रतिबंधकः। अन्यथातत्रापिप्रलयप्रसंगात्। एवमत्रापिसामग्रीसमवध
नाधिकरणक्षणःप्रागभावावछिन्नःस्थूलकालोपाधिःप्रतिबंधकोस्त्विति चेत्तत्राह। नचेतिए

वंक्षीति। सृष्टिप्रलययोस्तमःप्रकाशवत्परस्परंविरुद्धस्वभावत्वादेकस्यसत्वेऽपरस्यासत्वं
वाच्यं। ततःसृष्टौभवितव्यायांप्रतिबंधकाभावत्वेनप्रलयाभावोहेतुर्वाच्यः। सचस्वका
र्योत्पूर्वकालेसत्वंनियतमपेक्षतेअतःसृष्टिकारणप्रलयाभावाधिकरणीभूतकालस्य
नप्रलयाधिकरणत्वंनदसत्वात्। नापिसृष्ट्यधिकरणत्वंजनिष्यमाणत्वात्तस्याः। अतउभ
यानाधिकरणस्यापिसत्वादतिरिक्तकालसिद्धिप्रसंगःस्यात्सचप्रकृतानुपयुक्तत्वा
वहाराविषयत्वान्नशक्यवचनइत्यर्थः। नन्वेवंविधेपिकालःकृतोनेत्यत्राह। कार्यंतिरो
धीसृष्टिःदेवरभावःप्रलयः ताभ्यामतिरिक्तस्यतदुभयानधिकरणस्यापिकालस्य। उक्तौ
यौसृष्टिप्रलयौतयोर्मध्येएकस्याप्यधिकरणंनभवति। एतदुभयव्यवहारातिरिक्तव्यव
हाराभावात्तत्साधकार्यांतरमपिनास्तीत्यतःसुतरांतत्सिद्ध्यभावइत्यर्थः। ननुयस्मिन्का
लोपाधौयत्कार्यंजायतेतत्कालोपाधिप्रागभावस्तत्कार्यंप्रतिबंधकइतिचेत्तत्राह। नचेति।
तस्मिति। कार्याधिकरणकालोपाधिप्रागभावस्यप्रतियोगिप्रतिबंधकत्वेकौकारणसामग्र्या
एवस्वकार्यप्रतिबंधकत्वात्कार्यंकिमपिनोत्पद्येतैवेत्यर्थः। ननुनाविकार्याधिकरणक्षणस्या

पिकारणत्वात्तदभावप्रयुक्त इदानीं कार्याभाव इतिचेत्तत्राहाननवेतिाङ्कृत्कारणैरितिाश्रुत
सिद्धमिछायाःकारणत्वंमतस्तस्याएवकारणत्वमुचितंाबकुलान्निधानंतुविषयनेदा
न्निमायेणज्ञेयंाइछायाभावरूपत्वात्साधवंाद्रणाभावस्यप्रतियोगिनिरूपणाधीन
निरूपणत्वात्तस्यकारणत्वेगौरवंाययापिनांतरीयकतयाकारणत्वंप्राप्तंतत्रापिनसंमु
खेनाकिंतुप्रतिबंधकाभावत्वेनैवकारणताापथादाहकार्येऽग्नेजकाभावविशिष्टमाण
प्रतिबंधकत्वाद्ग्नेजकाभावविशिष्टमएपभावस्यप्रतिबंधकाभावत्वेनैवकारणतान
स्वरूपेणातहिदंडादीनामपिकिमेवमेवकारणतानेत्याहदंडाद्यभावइतिाप्रकृतेपीति
इछायाएवकारणत्वपदेापितत्कार्याधिकरणद्रणविशिष्टायाएवहेतुत्वंवाच्यंतेन
कार्यप्रागभावकालेविशेष्यसत्वेप्युत्पाभावस्यसत्वाद्विशेषणाभावाच्चतोविशिष्ट
भावइतिन्यायात्ाययसत्वेयसत्वंयद्भावाद्यदभावस्तत्तद्धेतुकमित्यन्निेत्यद्रणस्यैव
कारणत्वमाशंक्यतेाननिवितिाएवमपिविशेषणसत्वाद्विशेष्यासत्वेऽप्यमानेपिसविशेष
णहिविधिनिषधौविशेषणमुपसंक्रामतेाविशेष्येबाधकेसतीतिन्यायाद्रणस्यैवका

रणत्वमागतंाकिंचेद्विशेषणांतरंायेनापीछायाःकारणत्वंवाच्यंतेनापीछात्वेनैवननुतत
द्रणविशिष्टेछात्वेनापिजौरवग्रहस्तत्वात्ाघरकारणतायांदंडत्वेनैवयथानदृष्टदंड
त्वेनापीतिाकार्येत्यत्रौनुद्रणसहकारिणमपेक्ष्यैवकार्यकारित्वंनतन्मात्रेणेतिचेद्भू
यात्तदात्रश्रव्यःसइत्यर्थः। साधनपरंपरावेतिासाधनमेवसाध्यत्वेनहेयंाएवंचेतियत्
त्कार्यंजायतेतेनकार्येणतत्पूर्वतनपूर्वतनसाधनपरंपरास्तीतिज्ञायते। सावच्छूविधिश्रांत
वाच्याअन्यथाऽव्यवस्थादोषआपतेत्रास्तुर्ध्मणिकीसेतिचेत्सोकामयतबहुस्यांप्र
जायेयेत्यादिश्रुतिविरोधान्नतथातथासतित्रमाणांतरसिद्धत्वादनन्यगतिकत्वात्त्व
त्प्रिकारणत्वेनेछावश्यंवाच्या। अन्यथाइछायांकारणता व्यवस्थितावनुच्यमानायांतये
साधनसाध्यपरंपरासत्वासत्वयोःकार्यतदभावयोर्वाआकस्मिकत्वंस्यात्। तथासतिब
ह्यमतप्रवेशःस्यादितिभावः। वादीस्वमतंसदोषमाहायसिद्धांतिमतंस्वीकृत्यशंकतेनन
तिापरस्यरविरुद्धसर्गसंहारयोःसिद्ध्यासंजिहीर्षालक्षणेाभयकारणयोःसर्वदासत्वा
त्सार्वकालिकीसृष्टिरेवस्याद्वासार्वकालिकःप्रलयोवेत्यत्रद्वयंसमाहितिरितिप्रश्नेउत्तरं

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

तद्वकेति। सर्वस्या सर्वमपि नस्यादित्येवंविधायात्र उक्तप्रक्रीरीतिस्तया तुरीत्यासर्गत्रलयो
कारणेनिश्चीयमानेविमर्शोविचारःइदमुपपन्नं नवेत्येवंविधःपर्यवस्यतिसंभवतीत्यर्थः।
नन्वेति। तद्विचारणमपिवदृपमाणश्रुत्यादिषुयःस्रष्टादित्रकार उक्तस्तेनैवत्रकारेणास्तिवे
परलोकमतिमद्भिःकर्तव्यमित्यर्थःतथासतिसिद्धमिच्छाया एवसर्वकारणत्वमितिभावःतदि
च्छेति। सृष्टीच्छात्रयोजकत्वमित्यर्थः। एवंवसतीति। स्वक्रीडार्थमेवजगन्निर्माणमित्येवंरू
पेऽर्थेसिद्धेसति। जगत्कारणेच्छारूपवस्तुनियमानावेतन्निबंधनं ...नस्यात्
दृष्टावेवक्रीडापिनस्यादित्यर्थः।तदर्थमिति।वेवित्र्यपूर्वकक्रीडार्थक. ...च्छेद
त्वेसतितदातदातत्कालावच्छेदेनातीतानागतवर्त्तमानत्वादिज्ञापनायत ...क्रस्यार्थ
गतिकालपरिमित्यर्थंविधाययथेदानीमस्मदादीनांवर्त्तमानत्वादिना ...उपपद्य
तत्थैव...गवान्करोतीतिवैदिकवाक्याश्रुतस्यार्थस्येच्छाकारणत्वस्यानुपपत्ते ...मीयते
निश्चीय...त्यर्थः।एतंसतियत्रयदायद्यघात्रतीयतेतत्रतदातथैवेतिनियमः ...ष्टारनष्ट
...नवतारुतरतिपूर्वकसर्वभावयुगपद्भावोनत्रसज्येयातामित्यर्थः।इदानीतनानांव...